QL 737.C23 M48 2007
RSVL 8882

6682

Q2: 4146V
N

Q2: 4146V
N

अथ श्रीमद्दिग्वाप्रियाविलास प्रबंधः प्रारंभः

SANSKRIT ... PEETHA
TIRUPATI
KENDRIYA * LIBRARY.
6682

R
S
V
L
06682

श्रीः वंदे वंदारुमंदार सिंदिराज मधुव्रतं ॥ श्रीविश्व प्रिययोगींद्र ह्रदब्ज निलयंहरिं ॥१॥ केषांचिद्भ
क्तिरीशे प्रभवतिनाहिते शास्त्रजज्ञानपूर्णाः केपिस्युर्मूलटीका प्रवचननिपुणा स्तेपिनाचारशीलाः यये
वंनोपवासा यतिशयितमहाक्लेश भाजस्तमेतैः सर्वैः पूर्ण गुणौघैर्गुरुवर ममलनौमि विश्वप्रियार्य ॥२॥
विश्व प्रियाख्य योगिंद्र चरितं विश्वपूजितं ॥ विशुद्धये वाक्यतनु मनसां वच्मि शक्तितः ॥३॥
आसीद्दि शुत्थ वंशीय स्थूलमुक्ता फलोपमः ॥ कृष्णार्य नामक स्तेपेतप स्तौळव मंडले ॥४॥
मूर्तिमां स्तपसोराशि रिवतस्या ऽभवत्सुतः ॥ वरदे स कुमाराभःकुमारस्ते जसा ज्वलन् ॥५॥
उपनीतो द्विजेंद्रेण वेदानधि जगौ वटुः ॥ श्रीवादि राज स हंशो दधिराका निशाकरः ॥६॥
विश्वाधीश्वर मौनींद्रो वटुमेन मचक्षत ॥ अयं सच्छ क्षणोपेतो विद्या सिंहासनो चितः ॥७॥
इति निश्चित्य स वटुं पितरं समया चत ॥ धन्यता मात्मनो मत्वा वटुं स गुरवे ददौ ॥८॥
स्वपाणिनी रजो ह्रूत विश्वेश मुनि हस्ततः ॥ न्यासा श्रमं दापयित्वा स्वांतिके तंच कारसः ॥९॥
विश्वप्रियेति स्वगुरु दत्तं नामार्थव न्मुनिः ॥ कुर्वन्स दृत्थव शुगः शास्त्रं मारुत मध्यगात् ॥१०॥
सौधार्थ कथनव्यग्रा मस्य वाग्धोरणीं बुधाः ॥ जय वेंकटार्य प्रमुखाः प्रशशंसुः समगताः ॥११॥

गुरुहय युतः कृष्णं पूजयन्स बभौकिल ॥ शुक्लांगि रस संयुक्तो बालचंद्र इवोदितः ॥१२॥
ज्ञान भक्ति विरक्त्यादीन् दृष्ट्वा तदरयोपिहि ॥ प्रतिमानं प्रकुर्वंति प्रल्हाद ममरा यथा ॥१३॥
तदाकोच्ची महीपालः सर्व तंत्र विशारदः ॥ भेजे पूर्णत्रयी नाथं मोक्षमार्ग विवित्सया ॥१४॥
तद्भक्ति सारसं तुष्टो हरिः स्वप्नेऽ वदत्प्रभुं ॥ वादिराजोक्त पद्धत्या भजन्मां मुक्तिमेष्यसि ॥१५॥
इतिस्वाप्न वचः श्रुत्वा भूपालो विस्मितेभृशं ॥ भटान्सं प्रेषया मास गुरुराज मठंप्रति ॥१६॥
विश्वेश मुनि रागत्य विष्णुदीक्षा प्रवर्तकं ॥ भूपं चकार सोप्यासी न्मध्वसित्धांतपारगः ॥१७॥
श्रीमध्वमुनि सित्धांत सित्ध दिव्यार्थ दर्शकौ ॥ ततो विष्णुपदंयातौ पुष्पवंतौ यथागुरू ॥१८॥
अथदेशिक वर्योसौ विरक्ति वरभूषणः ॥ अन्नं सुदुस्त्यजं त्यत्का लाजमुष्टिं ग्रसन्बभौ ॥१९॥
भुवनेंद्र स्वामिमुखा दृष्ट्वा वैराग्यमी दृशं श्रीविष्णु तीर्थसद्दंशमणौ युक्त ममन्वत ॥२०॥
तुरगास्य पदद्वंद्व सुभक्ति भरमुद्वहन् ॥ संस्थानभारं गुरुराट पदे स्थापयितुं मुनिः ॥२१॥
सोदापुरं समगम द्गुरूपा साहि सित्धिदा ॥ पंचवृंदा वनाभ्याशे देववर्य निषेविते ॥२२॥
नक्तं दिवंप पाटासौ समीर समयंगुरुः ॥ तीर्थक्षेत्रा दिकंगंतुं गुरुराजस्य सन्निधौ ॥२३॥

प्रणमत्यस्य शिरसि पेतुर्मत्रा क्षताः किल ॥ देवोत्तम हरेः पेटीं धृत्वा शिरसिं सद्गुरुः ॥२४॥
तेवनेन जगामासौ विभवं हरयेर्पयन् ॥ तीर्थानि क्षेत्र मुख्यानि गत्वा तत्रत्य सज्जनान् ॥२५॥
अनुगृह्या ययौद्रष्टुं रजतास नगंहरिं ॥ मार्गे ऽरण्ये क्वचिद्हासं चक्रेश्यश्चापि धीरधीः ॥२६॥
श्रुत्वोदंतं प्रभुवर स्तंदेशं रक्षितुं ययौ यत्ररात्रौ गुरुवरः संस्थान सहितोऽ वसत् ॥२७॥
तत्रसेना पतिर्व्यूह्य सेनां द्वारि व्यवस्थितः ॥ तेनरुत्धो दंडनेता स्वग्राम मगमन्निशि ॥२८॥
ततः प्रातः समागम्य गुरुं नत्वाऽब्रवीद्दचः ॥ क्वसेनेति गुरुस्तस्य स्मितमुत्तर मातनोत् ॥२९॥
तदारभ्य जनाः सर्वे भूतनाथो गणैर्वृतः ॥ एतत्समीपे वसति रक्षन्निति हि मेनिरे ॥३०॥
क्वचिद्दुर्गा तरेरात्रा वुवास गुरुपुंगवः ॥ संक्षाळ्य पात्राण्या गंतुं जना दुर्गा द्बहिर्गताः ॥३१॥
दुर्गद्वारि पिनत्धायां चुक्रुशुर्भ यपीडिताः ॥ तदाकवाटं निर्भिन्नं दृष्ट्वासर्वेपि विस्मिताः ॥३२॥
कंचिद्ग्रामं जिगमिषुः पथ्यान्नं द्विज पुंगवं ॥ प्रत्यूचेऽ त्रभवे चित्र मितितं ग्राममापसः ॥३३॥
तत्राद्विजोऽ तिधनिकः क्षणार्थं समयाचत ॥ भिक्षावसाने यतिराट् ग्रंथ लेखन तत्परः ॥३४॥
भूअत्तदास धनिको पादमूरौ दधन्कुधीः ॥ उपविश्या ब्रवीद्भूतं क्व नारायण संज्ञितं ॥३५॥

इत्युच्चैः प्रजहा साथ गुरुः क्रोधवि मूर्छितः ॥ रात्रि पूजा मकृत्वैव वेश्यांतर मगात्ततः ॥३६॥
तदैव धनिनो गेहे कृष्णवत्मा विवेशह ॥ कुटुंबिनस्त स्यवध्वो गर्भिण्यो भृशपीडिताः ॥३७॥
उदरव्यथया रावै स्तारैः समभि चुक्रुशुः ॥ तदाधनी भृशं तप्तो गुरुं शरण मेयिवान् ॥३८॥
तदादयालुं यतिराट् भूतराजं सुकोपितं ॥ शमया माससंप्रार्थ्य स्त्रियः स्वस्था बभूविरे ॥३९॥
एवंतीर्थाटनं कृत्वा पर्याये समुपस्थिते ॥ वराहतु रगास्येतः प्राविश द्रजतासनं ॥४०॥ श्रीविश्व
प्रियथोगि वर्य चरण प्रोत्फुल्ल पंकेरुहासक्ताः सज्जन चंचरी कनिवहा मध्वागमा ह्लादिनः ॥४१॥
त्रय्यंतध्व निधिकृते तरस्वाः मर्याय दिव्योत्सवं श्रीमध्व प्रियहंस वर्यरचितं द्रष्टुं समभ्याययुः ॥४२॥

इतिश्री महिश्वप्रियविलासप्रबंधे प्रथमोः विलासः समाप्तः ॥१॥

यथाधर्म सुतोराजा राजसूये महाक्रतौ ॥ कृष्णं संपूजयामास तथा यंमुनि पुंगवः ॥१॥
द्रव्याणि दत्वा विहद्भथः सदाश्री कृष्णमंदिरे ॥ सर्वमूल ग्रंथरत्न पारायण मकारयत् ॥२॥
सर्वाति शायिनीं पूजां त्रयी पारायणं तथा ॥ दृष्ट्वा सच्छास्त्र पाठंच नैछ न्मुक्तिं जनाभुवि ॥३॥
तदाकर्नाटकाधीशः कृष्णराज इतिश्रूतः ॥ युतोऽ मात्यैः कतिपयैः सैनयाच्च तुरंगया ॥४॥

गुरुशेखर पर्याये कृष्णं द्रष्टुं समभ्यगात् सदा समाजः सुमहा नभूच्छ्री. कृष्णमंदिरे ॥५॥
अन्येषां यति वर्याणां काश्मीरांबर धारिणां ॥ सभायां राज सिंहस्य कौपीन वरभूषणः ॥६॥
यतिराट् शुशुभे तत्रन्यासिनां भूषणं हितत् राजस्त्रियः सुंदरागं कृष्णं दृष्ट्वाऽति भक्तितः ॥७॥
हारान्मुक्ता मणियुतान् भूषणानिच सर्वशः ॥ उन्मुच्य निदधुः कृष्ण सन्निधौ यतिशेखरः ॥८॥
तानिसर्वाण्यु पादाय कृष्णराजं बहिर्गतं ॥ उपासर्प तयत्स्त्रीणां स्वातंत्र्यं शास्त्रनिंदितं ॥९॥
सराज शेखरो दृष्टः स्वीयं हारं महाधनं ॥ उन्मुच्य प्रददौ सद्यो वदान्यः कःपरस्ततः ॥१०॥
तैर्भूषणै रलंचक्रे गुरुर्यादव सत्तम ॥ गुणपूर्ण सुराग्रण्यं सर्व भूषण भूषणं ॥११॥
विभूषितं हरिं दृष्ट्वा राजापूर्ण मनोरथः ॥ गुरुंरहः समानीय प्रोचेस जगतीपतिः ॥१२॥
ब्रवीतु देशिकोत्तंसः कासेवा कृष्ण तुष्टिदा ॥ इतिपृष्टो गुरुः प्राह स्वन्नदानं हरेः प्रियं ॥१३॥
नित्यं कुर्वन्न दानस्य साहाय्य मितिचोदितः ॥ स्वसंस्थाना त्कृष्णपूजा वृत्तिमाज्ञा पयत्प्रभुः ॥१४॥
तत्क्षत्तवृत्या कृष्णस्य पूजाद्यापि निराकुळा ॥ एवं राजाधि राजस्य, बहुमानं गुरौपरं ॥१५॥
वैभवं वीक्ष्यदुष्टानां दुद्यसूयां कुरोऽजनि ॥ तेनदोषेण वणिजो निरुत्था बाणकर्मणि ॥१६॥

रथोत्सवस्य समये श्रुत्वा सयति पुंगवः ॥ सांयांत्रिका त्समानीय कर्पूर निचयं गुरुः ॥१७॥
बहुसाहस्र रूप्याप्य मार्पयत्पुरतो हरेः ॥ तत्कालेपि शुनाः केचित्सु ब्रह्मण्य यतीश्वरं ॥१८॥
प्रावोधय न्मध्यवाटव्या सदेवः प्रगृह्यतां ॥ सोदा मठीये श्रीकृष्ण पूजानो दीयते खलु ॥१९॥
श्रीविष्णुतीर्थ वंशीया यूयंते पितथाविधाः ॥ इति प्रेरित कर्मेदि किंवदंतीं तथाविधां ॥२०॥
श्रुत्वा गुरुर्व्यास देवंपर्याये समतो षयत् ॥ पूजामंत्र जपैस्तुष्टो मध्वनाथ स्त्रयीपतिः ॥२१॥
समाप्य यतिशेखरो यदुपतेर्महं सादरं सुधाशन समर्थितं हरिपदाब्ज भृंगः सुधीः ॥ सुमध्व मुनिसेवितं महित मध्यवाटस्थितं जगामहरिमर्चितुं पुरुट संपुटां तर्गतं ॥२२॥ सुमठम धिवसन्गुरु प्रबर्हःस्तुति नतिमंत्र जपैःप्रसाद्य देवं ॥ गुरुरथ परिगृह्य गुंतुमैछत्स पदिसुधाध वळोबभूव देवः ॥२३॥ जंबूफल समानाभं हरिंधवळतां गतं ॥ संजात शंकोयतिराद्नि दध्यौकिम भूदिदं ॥२४ इतितूष्णीं व्यासदेवं सजनान् समदर्शयत् ॥ तत्रा शीतिव यादत्यो दृष्ट्वादेवं तथाविधं २५ ननर्तसु समुन्नत्य हर्षाद्दिक सिताननः ॥ जगाद गुरुणा पृष्टः प्रसाद समयेपुरा ॥
एवंविधो हरिर्दृष्टः श्रीमद्भाग्यंतु किं ब्रुवे ॥२६॥

एवं प्रसाद विज्ञात हरिभावो हरिप्रियः ॥ मध्ये संस्थप्यवे देशं तुरगास्य वराहयोः ॥२७॥
पूजां नवविधांचक्रे पायसादीन् समर्पयन् ॥ जगाम तीर्थयात्रायै मध्ये मार्गेच हंसराट् ॥२८॥
सत्यधर्म इतिख्यातो वादिराड्भक्ति पूरितः ॥ गुरुंस्व मठमानाय्य व्यासपूजा मकारयत् ॥२९॥
महीशूर पुरं प्राप्य राज्ञा संपूजितो भवत् ॥ ततोबल मुरिग्रामे ह्यादश्यांस ह्यजाप्लुतः ॥३०॥
संपूज्य देवं पीठस्थः तीर्थदातुं प्रचक्रमे ॥ तदा रामाचार्यनामा स्नातोनद्यां ददर्शहि ॥३१॥
मार्तांड मंडल द्वंद्वं तदा स गुरुपुंगवः ॥ तमानीयच पप्रच्छ किं दृष्टं सह्यजातटे ॥३२॥
इतिसोपि यथादृष्ट मुत्कोच्चै र्गुरुमब्रवीत् ॥ किं त्वं पीठं समध्यास्से पश्यतेजो मयंगुरुं ॥३३॥
इत्युक्तः सहसाऽपश्य त्पश्चाद्भागे तथाविधं ॥ ज्ञात्वा श्रीवादि राजस्य सान्निध्यं पीठमत्यजत् ३४
ततः प्रभृति योगींद्रो भूभावु पविवेशह ॥ ततोघट्टा दवतरन् शिरोचल मुपागमत् ॥३५॥
ग्रंथ लेखन कालेतु बुभुक्षुं रामनामकं ॥ कदली फलोच्चयं दत्वा भक्षये त्याह योगिराट् ॥३६॥
सान्निधानं विहायाद्यीत्युत्काऽन्यत्र गतोद्विजः॥ सर्वत्र सगुरुं दृष्ट्वा पुनः सन्निधि मागतः ॥३७॥
कथं भुंजे यतिवर दृश्यसे त्वंहि सर्वतः ॥ इत्यब्रवी त्तर्ह्यत्रैव स्थित्वा भुंक्ष्वेति चोदितः ॥३८॥

सावित्मित स्तथा चक्रे किं चित्रं हरि किंकरे ॥ ततोऽवरुह्य गुरुराट् गज्जलदी मुपागमत् ॥३९॥
तत्रमाया नदीतीरे संगृह्य हरिपेटिकां ॥ उपाविश द्धोरूपार जनीचा भवत्तदा ॥४०॥
तत्रसत्राधिपो विप्र स्तत्कनिष्ठोपि कश्चन ॥ विज्ञापया मासतुस्तौ नेहस्थेयं मुनीश्वर ॥४१॥
द्वीपिभल्लूक निविड इत्युक्तः प्राहतौ मुनिः ॥ भवंतौ गछतंशीघ्र मागमिष्येज पन्नहं ॥४२॥
तदातौ किंचिदागत्य श्रितौ कंचिन्महाद्रुमं ॥ यामरात्रौन्य तीतायां क्षमाभृछ्रिखर देशतः ॥४३॥
सुमहान्द द्दशेदीप स्तत्पश्चा त्पादुकापदः ॥ समागछत्सं सवर्यस्ते जोराशिरि वज्वलन् ॥४४॥
स्वसन्निधिं समायांतं दृष्ट्वासमुनि पुंगवः ॥ साष्टांगं प्रणनासासौ भक्तिनम्र शिरोधरः ॥४५॥
गैर्वाण्या भाषयाचोभौ संवादं बहुचक्रतुः ॥ दृष्ट्वाचात्य द्भुतंरूपं श्रुत्वासंवाद मद्भुतं ॥४६॥
आश्चर्य पूरजठरेतौ विप्रौनिम मज्जतुः ॥ एवंचित्र चरित्रोऽसौ मुनिरत्नविर्वाजनः ॥४७॥
लाजभक्ष्यः पादचारी भूशायीव्रति पुंगवः ॥ सेतौस्नात्वा रंगनाथं दृष्ट्वावेंकटगं हरिं ॥४८॥
क्रमेण संचरन्योगी श्रीमत्सोदा पुरीमगात् ॥ त्रिविक्रम रथोत्सवं बहुजनान्न दानैस्समं सुधूप
वरदीपकैः परिसमाप्य योगीश्वरः ॥ हयानन महोदधाव वभृथं नवंकारयन् बभूवमुनि पुंगवो

हरि कृपा कटाक्षे क्षितः ॥४९॥ इतिश्री महिश्वप्रियविलासप्रबंधे द्वितीयो विलासः समाप्तः ॥२॥
तीर्थपल्ली मठेतिष्ठन् भुवनेंद्र यतीश्वरः ॥ ब्राह्मणा राधनं चक्रे गुरुपुण्य दिनेकिल ॥१॥
ब्राह्मणेषु निमज्जत्सु तुंगभद्रा नदीजले ॥ तत्र कश्चन विप्रेंद्रो नदीमध्य शिलातले ॥२॥
दृष्ट्वा विश्वप्रियगुरुं प्रणनामाति भक्तितः ॥ संघेसंघे द्विजेंद्राणां किं वदंती तदाभवत् ॥३॥
धन्यो विश्वप्रियगुरु रत्रागत्याद्य तिष्ठति ॥ इतिश्रुत्वा भुवनराट् प्रेषयामास किंकरान् ॥४॥
तदा सोदा मठं प्राप्य तत्रत्या न्प्रविचार्यते ॥ सोदापुरस्थं विज्ञाय विश्वप्रिय गुरुं पुनः ॥५॥
अवदन् गुरवेसोपि निमग्नो विस्मयांबुधौ ॥ कदाचि द्भुवनेंद्रस्य गुरोः पार्श्व मुपागमत् ॥६॥
यतींद्रोसौ तदातत्र कृष्णाचार्य इतिश्रुतः ॥ हरपनळळी ग्रामवासी गुरपाद मधिक्षिपन् ॥७॥
अश्रृण्वंस्त त्प्रोक्तमर्थं मुद्घोष मकरोद्विजः ॥ श्रुत्वोच्यता मितिगुरु र्भुकुटी कुटिलाननः ॥८॥
स्तंभया मासतत्काला द्राग्धाटीरहितोभवत् ॥ तदाकोच्ची महीपालो विद्वद्राज शिरोमणिः ॥९॥
वादिमत्तेभ पंचास्यो ग्रंथकृद्भगवत्प्रियः ॥ स्वरूप सुखभोगेतु यदासं दिग्धमानसः ॥१०॥
पूर्णवेद पतिःस्वप्ने नर्तनं कुर्विंतिप्रभुं ॥ प्रोवाच नृत्तसमये परमानंद निर्भरः ॥११॥

अनुभूत स्तदाराज्ञा राजा संछिन्न संशयः ॥ राज्ञा सं प्रार्थित स्तेन तंदेश मगमद्गुरुः ॥१२॥
सराजा गुरुराजंतं विद्वद्राज शिरोमणिः ॥ भक्त्या संपूजयामास यादवेशं विदेहवत् ॥१३॥
सच्छास्त्र स्थापकं भूपं विष्णुदीक्षा प्रवर्तकं ॥ वीक्ष्यानु गृह्णन्शिष्येण मुदमाप यतीश्वरः ॥१४॥
क्षमापते स्सहवासेन जनास्त द्देशवासिनः ॥ भगव द्भक्तिभरिताः सत्संगो मुक्तिपद्धतिः ॥१५॥
तद्राज वर्यपूजायै भगव त्प्रतिमा ददौ ॥ संस्थानपूजा सदृशीपूजाऽ रघ्वानृपालये ॥१६॥
पूर्णत्रयी मठेतत्र तुरंग वदनं हरिं ॥ संस्थाप्य प्रययौद्रष्टुं वादिराजं जगद्गुरुं ॥१७॥
अण्णय्याचार्य वर्यस्य बहुकालाद पुत्रिणः ॥ पुत्रो बभूव तच्चित्रं गुरुवर्य प्रसादतः ॥१८॥
आख्यान प्रोक्तसल्लिंगै र्व्यासानयन पूर्वकैः ॥ निरन्नत्व व्रतमुखै रयंवृंदावनार्यकः ॥१९॥
इतिव्यजान नामोदो मृगना भेरवारणः ॥ तदाज्ञान वयोवृत्त महीपाल विकर्तनः ॥२०॥
निष्क्रम्य ब्रह्मरंध्रेण विष्णोःपाद मुपेयिवान् ॥ तदनंतर जो राजा रामवर्मेति विश्रुतः ॥२१॥
गुरु संदर्शनाकांक्षी प्रेषयामास किंकरान् ॥ आजगाम स योगींद्रो वत्संगौरिव वत्सला ॥२२॥
पथिदेवालयं प्राप्य ग्रामे कुक्कुट पंजरे ॥ बहिष्कृतो यदाराज्ञा तदा झंझानिलो महान् ॥२३॥

प्रादुर्भूतो देवगृह प्रासादा श्वत्थपादपान् ॥ उन्मूल्य प्राक्षिपत्तोये ताटाके वीक्ष्यतन्नृपः ॥२४॥
योगींद्रं पूजयामास मग्नो विस्मय वारिधौ ॥ एवं विचित्र चारित्रो मुनीराजा नमभ्यगात् ॥२५॥
सराजा सेनयाभक्ति भरितो भरतोयथा ॥ प्रत्युज्जगाम विभवैः छत्रचामर पूर्वकैः ॥२६॥
समानीय गुरुंराजा मठेस मुपवेशयत् ॥ कंचित्काल मथावात्सी त्तिष्यस्नेह वशोगुरुः ॥२७॥
नाळिकेर सहस्रेण क्षुत्तेव्यासाभिषेचने ॥ पूर्वरात्रो रामनाम्नः स्वप्ने कश्चिज्जगादह ॥२८॥
श्वोभूते व्यासदेवस्य जटासं दृश्यते ध्रुवं ॥ प्रातरूचे सविप्रेंद्र स्तथा सगुरु सन्निधौ ॥२९॥
अभिषेके संप्रवृत्ते तथाराज्ञि समागते ॥ जंबूफल निभेव्यासे धवळा समदृश्यत ॥३०॥
रेखा कर्पूर सदृशी तांदृष्ट्वा मुमुदुर्जनाः ॥ अदृष्ट पूर्वा सारेखा दृष्टातस्मि न्दिनेजनैः ॥३१॥
ईदृशो व्यासदेवस्य प्रसादो गुरुपुंगवे ॥ दानवारि जनालभ्यः किमुमानुष देहिभिः ॥३२॥
कृष्णराज समाहूतो महीशूर पुरंगुरुः ॥ गत्वोवासा चिंतो राज्ञा व्यासाराधन तत्परः ॥३३॥
ततः श्रीकृष्ण देवस्य पर्यायें समुपस्थिते ॥ कृष्णव्यास सभायोग मसहंतो मठाधिपाः ॥३४॥
मिळित्वा लौकिकास्थाने व्यवहार मकुर्वत ॥ कृष्णराजं समामंत्र्य भक्त्या तेन प्रपूजितः ॥३५॥

तन्निसृष्टेन सैन्येन सहागाद्रजतासनं ॥ विचार्यहूणाधि पतिर्व्यास कृष्ण समागमे । न विरोध इतिह्याह पर्यायः समजृंभत ॥३६॥ यादवेशनि गमे शभैळने देवदुंदुभि गणाविनेदिरे ॥ नर्तनं विदधु रप्सरोगणा स्तुष्टुवुर्मुनिगणा महोत्सवं ॥३७॥

इति श्रीमद्विश्वप्रिय विलास प्रबंधे तृतीयो विलासः समाप्तः ॥३॥

श्रीः। वासवी सुतसमर्पितं परं कल्किदोरमुख मत्रकश्चन ॥ प्रेषितं गुरुवरेण दूषयन् प्राक्षिपद्भुवि यतिःप्रकोपतः ॥१॥ तेन दोष निवहेन चक्षुषः स्थानमत्यज दमुष्य विश्वकः ॥ स्वाम्रपद्य गुरुराज वाक्य सन्मानता पिकिल सित्थता मगात् ॥२॥ शिष्य भूसुर वरेण कारय न्नाग्निहोत्र मुखरोष्टि संततीः ॥ कालदोष मथ चिंतय न्सुधीस्तस्यचा श्रमवरं ददावथ ॥३॥ विष्णुतीर्थ मुनिवंश जस्यतद्युक्त मेवसुख भुक्त्यनंतरं ॥ अच्युत प्रमितिवंश सिंधुसच्चंद्रमाहि रघुवीर नामकः ॥४॥ आययौ गुरुवरस्य सन्निधिंमध्वतंत्र परमार्थलिप्सया ॥ शुद्धबुद्धि मथवीक्ष्यतं मुनिंपाठय न्मुदमवाप योगिराट् ॥५॥ श्रीवराह मुनिभृंगवरेण स्वीयदिव्य सुमनोनु गामिना॥ व्यासदेव तुरगास्य पूजनं कारयन् परितुतोषधीरधीः ॥६॥ तेनसाकमथसांदि दक्षया वादिराज चरणारविंदयोः भीमसेतु ॥

मठगेन वर्त्मनाप्याययौ सगुरुराट्पुरं मुनिः ॥७॥ तत्रसंव सतिमौनि पुंगवे कोपितार्किक शिखामणिर्द्विजः ॥ सौख्यतीर्थ वरशास्त्र विचारे कोपितो बहिरगा त्प्रविनिंदन् ॥८॥ मौनिवर्य गुरुनिंदक मारादागतं परिसरे धवळायाः ॥ सन्निपात्य वरपाथ सिदंतौ भूतनाथ गुरुराट् प्रबभंज ॥९॥ कोपितत्र धनिकःस मुपागाद्दारितोपि सबवंध तुरंगं ॥ भूतनाथ मतचंपकवृक्षे सोश्वराड भवदद्रि शिखायां ॥१०॥ प्रातरेत्य गुरुवर्य नियोगात्सानुसीम्नि तुरगंसमवाप्य ॥ विस्मित स्सजनतायुतो धनीनाळिकेर फलभार मार्पयत् ॥११॥ वादिराज गुरुभक्त जनौघसं बभूवमिळितो गुरुपार्श्वे ॥ मोदतीर्थ गुरुशास्त्र जसारंपातुमेव गुरुवर्य मुखाब्जात् ॥१२॥ पूर्व पक्षनिवहा न्प्रखंड्य त्यत्रमायिरचिता न्विनोदतः ॥ मेनिरे गुरुवरेसु सन्निधिं वादिराज मुनिपस्य सज्जनाः ॥१३॥ पूजयत्यतितरां गुरुवर्यें माधवं कुसुम राशिभिरत्र ॥ प्रार्थना क्षणगळ त्कुसुमं तत्प्रार्थकाय सददौ तदद्भुतं ॥१४॥ दूरदेश गतभक्त जनोघानुत्धरन् हरिकथा प्रसंगतः ॥ पेटिकां शिरसिधारयन् कृशोप्याययौ सहरिभक्ति तुंदिलः ॥१५॥ तत्रतत्र सुजनाननु गृहणन्नुत्तरां गुरुरगात्ससह्यजां ॥ वेदगर्भ कुलमंडन भूतःशिष्य संघयुत एत्यननाम ॥१६॥ सेतुमाधव

इतीड्य सुनामामौनि राजमनुवर्णित नत्वं ॥ देववर्यं सदृशं सविदित्वा मध्वशास्त्र मखिलं प्रपपाठ ॥१७॥ तत्रनिर्मलतमे गुरुवर्यो रामदूत मथभाविसमीरं ॥ ग्रामवर्य उपवेश्य सपर्या वृत्तिमत्र सजनै रकारयत् ॥१८॥ तत्र भक्तनिवहेष्वथ कश्चिन्मातृका पठन शक्तिविहीनः ॥ भाष्यमेत दमुतःसच शृण्वन् संबभूव पठने पटुतावान् ॥१९॥ योगिवर्य गुरुमंत्रि तरूप्यं भक्तिपूरित मनाः प्रपूजयन् ॥ हर्यनुग्रहवशा दणतोसौ पर्यमोचि धनिकेनचकेन ॥२०॥ तत्रतत्र सुजनाननु-गृहण न्मौक्तिकं पुरमगात्सुधीरधीः ॥ मौनिवर्य महिमाऽ सहिष्णवः केपितत्र सुविरोधमाचरन् ॥२१॥ ग्रंथकर्षण मुखान्मुखभंगा न्नंदितीर्थ मुनिशेखर काले ॥ चक्रुरेव कुजनाः खलुतेषां संभवेन्नि जगतिर्हिनान्यथा ॥२२॥ एवमेव कुजनाः स्वमतस्था श्चक्रुरत्र गुरुवर्य विरोधं ॥ योग्य तानिगमकांहि बहिष्ठं नैवलिंग मितिशास्त्ररहस्यं ॥२३॥ तत्रसंवसति माटमहीपः प्रार्थनां स मकरोद्दिक्षया ॥ शिष्यभूपति वरार्थनयात देशगे समवच्चित्पुरे ॥२४॥ तत्रकेपि गुरुवर्य सकाशं मोदतीर्थ गुरुशास्त्रजसारं ॥ श्रोतुमाय युरहंच तदाऽगां पूर्वपुण्य विभवोहि ममासीत् ॥२५॥ तत्रवत्सर गणा न्प्रपाठयन्नस्म स्मदादि शुभशिष्य संचकान् ॥ अध्युवास परमादरार्चितो माट

भूप तिलकेन सद्गुरुः ॥२६॥ अल्पमन्न मपिसंत्यजन् पुनर्लाजपिष्ट भुगलंयतिवर्यः ॥ दृत्धता मुपगतो हरेर्दिन द्वंद्व मप्युपवसन्नपाठयत् ॥२७॥ आजगाम रघुवीर सन्मु निश्चित्पुरं निजगुरो र्दृदक्षया ॥ संवसन्पुरवरे हरिगीता भाष्यमद्भुत मसौप्रपपाठ ॥२८॥ मौनिवर्य विरहातुरो मुनिस्त्वा जगाम सुरवराह नामकः ॥ शिष्यवर्य ससितो गुरुस्त दात्रैशिवं पुरमगा न्नृपार्थितः२९ सोषिभूप तिलकः स्वसेनया छत्रचामर मुखैरुपचारैः ॥ स्वानुजन्म सहितोऽभि गम्यतं स्वर्ण पुष्पनिकरै रवाकिरत् ॥३०॥ तत्रराज वरभक्ति निवत्धस्त्रै शिवेपुरवरे समवात्सीत् ॥ राजदत्त-नवरत्न सुहारै रिंदिरावर मलंस मर्चयन् ॥३१॥ राजवर्य गुरुवर्य मेळनं द्रष्टुमत्र सुजना स्समा-ययुः ॥ मोदनीर्थ वरशास्त्र सुभक्ति र्भूपतिर्नसुलभः कलौकिक ॥३२॥ वादिराज कृतयुक्ति मल्लिका युक्तयुक्ति निवहान् गुरूदिवान् ॥ शृण्वतां ह्रदिम मौनहितेषां मोदसंततिरहो सुजनानां ॥३३॥ माटभूपति वरोथ विरक्तः क्षुल्लकामनि वहात्सुधीरधीः ॥ वाजियुक्त रथचामरादिकं द्रव्यजात मखिलं गुरवेऽ दात् । यादवेश्वर महोत्सव हेतो स्सप्रगृह्य रजता सनमाप ॥३४॥ वराह मुनिपूजने कलिबला न्निरुत्धे गुरुस्तदाय दुवरार्चनं रहसिकारयं स्तेनसः ॥ हरे रपिमनोगतं

समवलोक्य कर्मदिराट् तृतीय मपियोगिनं निजमठेऽ करोद्बालकं ॥३५॥

इति श्रीमद्विश्वप्रियविलास प्रबंधे चतुर्थो विलासः समाप्तः ॥४॥

पर्यायकाले सवयोगतोपि युवेवचक्रे खलुकृष्णपूजां ॥ नवैपुनर्भक्ति भरानतानां भारायपूजा नृहरेर्भवित्री ॥१॥ मठंनवंपाप विनाशनी तटेनिर्मायवृत्ती रथतत्र कल्पयन् ॥ उत्तप्तचामीकर दिव्यमंटपे निधाय घोटास्यम पूजयत्सुधीः ॥२॥ तत्काले रविवर्म भूपतिमणिः कोच्चीधरित्री पतिस्त्वानेतुं मुनिपुंगवं भटजनाना ज्ञापयत्धीरधीः ॥ श्रुत्वा तद्भट भाषितं मुनिवरः श्रीमद्वराहाभि धन्यासिश्रेष्ठयुतो जगामनृपतिं सह्यादिराजाप्रियं ॥३॥ शुभगुणगणभारे शुत्धवैराग्यसारे गतवति निजदेशं विश्ववंद्येयतींद्रे ॥ नरपतिरथदृष्टः सेनयाराजभूत्या परिवृतउपयातः स्वंगुरुंसं-ददर्श ॥४॥ शिबिकामधिरोप्य योगिवर्यं धृतचामीकर चामराग्रय हस्तः ॥ विवभौ यतिराजस-न्निधानेन रराजो गुरुसन्निधौयथेंद्रः ॥५॥ योगिंद्रं निजमंदिरंस नरराडानीयपीठे शुभेसंवेश्यां-घ्रियुगंसु पंकजनिभं प्रक्षाळयमूर्धन्यपः ॥ दध्रेसर्व जगत्पवित्र ममलं सौवर्णपुष्पै रळंसंपूज्य प्रममज्जमोद जलदौधन्यः सपृथ्वीपतिः ॥६॥ वादिराज गुरुभक्त जनौघो योगिवर्य पददर्शन-

कामः॥ आययौ सुनिगमांत विचारः संबभू व मुनिवर्य सकाशे ॥७॥ निगमं पुरवरेश प्राज्य सत्सन्निधाने नृपवर गुरुभक्त्या सन्निरुत्थो यतींद्रः ॥ हयवदन पदाब्जं पूजयन् शिष्यसंघप्र वचनानि पुणोसावद्वमे कंन्यवात्सीत् ॥८॥ शुभगुण युतराज्ञो जन्मनक्षत्रयोगे वुधजन समवाय प्राभवल्लोकलद्यः ॥ नरपति रपिविद्वछ्रेखरः श्रोतुकामः सपदि वचनधाटीं सद्गुरोरानिनाय ॥९॥ मध्येसभंयति वरः शुभरत्नपीठे राजानुमोदित उपाविश दभ्यकीर्तिः ॥ यद्वत्थि माद्रिशिखरे मृगयूथनाथः सिंहोदिदक्षुरखिलं वर हस्तियूथं ॥१०॥ शास्त्रस्य योनिरिति विग्रह मारचय्य सूत्राशयं बुधवराज गदुःस्मकेचित् ॥ तान्सन्निवा र्ययतिराडु पचक्रमेत्र वक्तुंतदा वुधजनोहिम कोकिलोभूत् ॥११॥ स्फुटमहित सुवर्णास्यूत मुक्ताफल श्रीस्सुजन सुकृतलभ्या राजभि र्मान्निमान्या ॥ लदिवुध जनधार्या दिव्यविश्व प्रियोक्ताजयति सुगुणपूर्णा भारती हारतीयं ॥१२॥ प्रोद्यद्दादिच पेटपाटन पटौ योगींद्र वाग्जृंभणे प्रोद्भूते भयवेपथु प्रचलिताः स्विद्यन्मुखाः पंडिताः ॥ नैवोचुः किमपीह चंचलल्दोगंतुं प्रवृत्ताबहिः सर्वेनेमुर मुंनिपत्य भुवितं संमेनिरेवा-कपतिं ॥१३॥ स्मितयुतवचसा प्रशस्यसर्वा न्यतिपति रादरतस्तुतः सभायां ॥ मठमग मदसौ-

मदादि शिष्यैर्हय मुखभक्तियुते किमत्रचित्रं ॥१४॥ राजामात्यं विष्णुभक्तं द्विजाग्र्यं ज्ञात्वातेन प्रार्थितो भाष्यमस्मै ॥ टीकांविनातंच टीकार्थयुक्तं व्याचक्षाणंवीक्ष्य लोकाननंदुः ।१५। तेनार्थितः श्री हनुमत्प्रती कंसुसंपुटं भाविस मीरणस्य ॥ संस्थापयामास तदीयभक्ति बद्धोहनूमान्किल सन्निधत्ते ॥१६॥ सोदापुरे भाविसमीरणं गुरुंद्रष्टुं प्रदत्तं गुरुसार्वभौमं ॥ वीक्ष्यैव राजाविरहास होपिदत्वाधनंदिव्य विभूषणानि ॥ प्रस्थापयामास कथंचिदेव सतांप्रसंगो हिसुदुस्त्यजःसतां ॥१७ सोदापुरं तत्समवाप्य योगीवराह योगीशसु तो महात्मा ॥ कृतंशुभं सद्गुर वेऽर्पयन्सुधीरु वास-तीरे हरिपादजायाः ॥१८॥ वराहयोगी ससुधां सुदद्या मास्वाद्यचास्वाद्य पुनःपुनश्च ॥ अतृप्त एवप्रययौ हरेःपदंसुधा शनानां सहवास लब्धं ॥१९॥ उदूह्य पूजाभरमेषनित्यं हरेःप्रसादोऽयमितीक्षमाणः ॥ वराह वेदेशहयास्य पूजांप्रार्थ्यां सुरेंद्रैः सचकार योगिराट् ॥२०॥ मुक्तिप्रत्यूह वार्धिक्ष पणकरण सत्कुंभडिं भंयशोदाडिं भंतंद्रष्टु कामः सुखसमय मुनिप्रौढ सद्वाग्यरत्नं ॥ आनम्य प्रौढवादि द्विरदनि करसत्कुंभ संभेदकारि श्रीमद्दादीभ राजंमुनिकुलतिलकं संप्रतस्थे मुनींद्रः ॥२१॥ राजतास नमबाप्य पत्तनंमध्वदास मुनिवर्यमंडितं ॥ कृष्णपाद. जलजं विलोक्य.

चानंदसार जलधौममज्जसः ॥२२॥ रघुप्रवीर नामामुनिराजो द्रष्टुमेव मुनिवर्य्यं ॥ अभ्याययौत्व रावान् कलिकालेदुर्लभाहि देववराः ।२३। सुचिरं मरुदंश शास्त्रसारं पाठनाऽलेखन पाठनाद्युपायैः ॥ भुविसज्जन पात्रके निधायप्रतिगंतुं हरिसन्निधिं समैच्छत् ॥२४॥ शोचति रघुप्रवीरे क्रोशतिभु विसज्जनेच सर्वस्मिन् ॥ आयातिदेव विमानेवर्षति पुष्पाणि देवतानिकरे ॥२५॥ अद्वैक्रोधन नामकेह्युडु पसत्क्षेत्रेसु दर्शतिथा ॥ वाषाढे सुवराह वाजिवदन व्यासान्स मभ्यर्चयन् ॥ विप्रानो दन दक्षिणादि भिरसौ संतर्प्य कृष्णं स्मरन् पूषे वक्षण दानुवर्तन कृते विष्णोःपदं प्रापतत् ॥२६॥ विश्वाधीश्वर नामको यतिवरो भूयोपि शोचन्पुनः सह्यागीशसु सन्निधौ गुरुवरं बृंदाव-नाचार्यकं ॥ सद्बृंदावनगं विधायबहुधा दत्वा द्विजेभ्यो धनं स्वाहृन्नं रघुवीर योगिसहितः सर्व गुरोरार्पयत् ॥२७॥ देशीयः खलुकश्चन द्विजवरः स्वप्नेसु संबोधितः सोदांसद्गुरु मृत्तिका मुपनयन् चक्रेसु बृंदावनं ॥ स्वेनस्थापित मारुतेः सनिकटे कन्नप्पनाडी मठे भक्तप्रीतिवशः स्वयं गुरुवरोऽद्यास्तेच बृंदावने ॥२८॥ भक्तवत्सल तया गुरुवर्यो मृत्तिका युतसु संपुट संस्थः ॥ भक्तवर्य भवनेषु निषण्णोऽ दृश्य एव परिरक्षति भक्तान् ॥२९॥ राजतासन पुराधि

कृतोयः शिक्षयामि गुरुमित्य धिक्षिपन् ॥ वन्हियंत्र मथहूण धिक्कृतः स्वेमुखेऽ कुरुत तेन ममार ॥३०॥ एवमेव हरिदास वरेऽस्मिन् दुष्टसंघ विहितो ऽपराधः ॥ स्वात्मने फलति तन्नहि चित्रं मुक्तिगं सुखमतः प्रतिबत्धं ॥३१॥ एवंविधानि चरितानि गुरूत्तमस्य दृष्टानिचाप्त मुखतोपि मयाश्रुतानि ॥ लोकेषु विश्रुत तराणि मयोदितानिले शेनकः प्रभुतरः सकलानिवक्तुं ॥३२॥ त्रय्यंत पाठ नचणा बुधसंघमान्या वाग्वैखरीः सुललिताः सुखबोधकाश्च ॥ भक्ति प्रवाह मिळिता विविधाश्च पूजाः स्मर्तुर्लुठंति हृदयं ममदोशिकस्य ॥३३॥ यद्दाणी विबुधाधि-पैश्च शिरसा मान्यायदीयं यशः स्फारंदिग्व नितांजन श्रवण सत्ताटंक भूषायितं ॥ यत्पादां बुरुह द्वयी विबुध सन्मूर्धां किरीटायते श्रीविश्वप्रिय तीर्थमस्करिवरः सोऽयं सुरेंद्रायते ॥३४॥ इंद्रत्वं तव मस्करि प्रवरभो युक्तंतु मन्यामहे वाग्दंभोळि विपाटित प्रतिभट प्रौढोक्ति भूभृद्गणात् ॥ स्थित्वा विष्णुपदे धरातल जनक्षेमाय जीवातुक श्रीतत्वा मृतवर्षणा सुत्मनसा मीशत्वतो पिप्रभो ॥३५॥ चिदादि गुणसिंधवेनत जनावळी बंधवे प्रसून शरशंभवे हरिपदाज वंदारवे। नमोविजित वायवे सुजन कंजसद्भानवे, सुशिष्य मणितंतवे सुगुरवेसतां बंधवे ॥३६॥ श्री

विश्वप्रिय योगिवर्य करुणा पीयूष धारायुजा रंगाचार्य पदेन संविरचितो ग्रंथोय मिष्टप्रदः ॥ एनं ये प्रपठंति भक्तिभरिता स्तेषामभीष्टं ददात्यस्म द्देशिक दिव्य चित्तनिलयः प्रीतः सलक्ष्मी धवः ॥३७॥ इति श्रीमत्कोच्ची रंगप्पाचार्य विरचित श्रीमद्विश्वप्रियविलास प्रबंधे पंचमोविलासः समाप्तः ॥ समाप्तोयंग्रंथः ॥श्रीः॥ ❀ ❀ ❀ ❀॥

हें पुस्तक मलबारकोस्त कोची, येथें देवजी भीमजी यांचे
"केरळमित्र,, छापखान्यांत छापिलें.
शकें १८११ विरोधी नामसंवत्सरे.



इति श्रीमद्दिग्विप्रियविलास प्रबंधः समाप्तः